International Journal of Multidisciplinary Educational Research
ISSN:2277-7881(Print); Impact Factor :9.014(2025); IC Value:5.16; ISI Value:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
( Fulfilled Suggests Parametres of UGC by IJMER)
Volume:14, Issue:9(1), September, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

Cover Page

# पाञ्चरात्रागमे व्यूहविचारः

**यस् .गोपालकृष्णः**
**शोधच्छात्रःआगमविभागः**
**राष्ट्रियसंस्कृतविश्वविद्यालयः**
**तिरुपतिः**

अनादि - अविच्छिन्नगुरुशिष्यपरंपरागतः आगमः। वंशपारंपर्यक्रमागतशास्त्रसंदर्भ एव आगमः। भगवतः सगुणाराधनसाकारमूर्तिकल्पनसर्वस्व एव आगमः।आन्तरवरिवस्यां बाह्यवरिवस्यां च संसाधयितुम् आगमोक्त अर्चनमेव सर्वेषां प्रधानसोपानभूतं भवतीति वक्तुं नैवातिशयः।

स्वेष्टदेवतां मनसि संस्थाप्य तस्य गुणवैभवादीन् संस्मरन् भक्तः तादात्म्यं संसाध्य आगमोक्त अर्चनद्वारैव आनन्दमनुभवति।

स च आगामः देवता प्राधान्येन विष्णु - शैव - शाक्त - गाणापत्य - सौरादिभेदेन नैकविधः। विष्णु एव परदैव इति निश्चित्य विष्ण्वर्चनमेव परमं श्रेय इति संभाव्य विष्णुसंबद्धमन्त्रान् एव पठन् अर्चनो - त्सवादिक्रियाः कुर्वन् जन्मसाफल्यं प्राप्नोति आस्तिकः। स एव वैष्णवागमः । असौ द्विविधः वैखानसः पाञ्चरात्रेति ।

आगम मन्त्र - तन्त्र - तन्त्रान्तर इति सिद्धान्तभेदेन , चतुस्सिद्धान्त सहितः वासुदेव - सङ्कर्षण - प्रद्युम्न - अनुरुद्ध इति चतुर्भिः विभागैः व्यूहरूपाः ताप - पुण्ड्र - नाम - मन्त्र - याग इति पञ्चभिः संस्कारैः सहितः, अभिगमन - उपादान - इज्या - स्वाध्याय - योग इति पञ्चभिः कालैः प्रतिपादितः, स्थान - आत्म - बिम्ब - पात्र - भूत इति पञ्चशुद्धिसहितः, कर्मा - उत्सव - स्नपन - याग - बलि - शयन इति षड्विधविग्रहैः सहितः। इत्येभिः विविधैः अंशैः संवर्धितः पाञ्चरात्रागमः आगमेषु अद्वितीयं स्थानं प्राप्नोतीति निष्कर्षः।

भगवान् परमात्मा पर - व्यूह - विभव - अन्तर्यामि - अर्चा इति यथा उपदिष्टं तथा विशिष्टाद्वैतदर्शनग्रन्थेष्वपि अस्य तत्वस्य वैशद्यं अवभासते । भगवतः उपदिष्टेऽस्मिन् पाञ्चरात्रागमे व्यूहविचारः कथं प्रतिपादितः ? तस्य स्वरूपं कीदृशं ? इति यथामति पत्रेऽस्मिन् प्रस्तोतुमिच्छामि।

**व्यूहरूपाणि**

श्रीमन्नारायणः पञ्चधा विभक्तः।

**स वासुदेवो भगवान् सृष्टिस्थित्यन्त मुक्तिदः।**
**आत्मानं च द्विधा चक्रे पुनः केनापि हेतुना ॥**
**तयोरेको वासुदेवः शुद्धस्फटिकसन्निभः ।**
**नारायणो द्वितीयस्तु नीलाम्बुदसमप्रभः ॥**

**संङ्कर्षणो वासुदेवात् तस्मात्प्रद्युम्नसंज्ञितः।**
**प्रद्युम्नादनिरुद्धोऽभूत् सर्व एते चतुर्भुजाः**[1]॥ इति

वासुदेव ( नारायण ) - सङ्कर्षण - प्रद्युम्न - अनिरुद्ध इति विभिन्नाः व्यूहमूर्तयः पाञ्चरात्र पाद्मसहितायां दृश्यन्ते। एताः मूर्तयः क्रमशः एकैकस्मात् समागताः। सर्वा च सृष्टिः गुणाधीना भवति गुणाः तावत् ज्ञान - बल - ऐश्वर्य - वीर्य - शक्ति - तेज इति षड्विधाः भिद्यन्ते । एते गुणाः सृष्टि - स्थिति - संहारान् कुर्वन्ति । एकरूपः अनेकानि कर्माणि कर्तुं अशक्त इति निश्चित्य गुणान् विभज्य मूर्तिषु आपाद्य सृष्टिकर्म करोति परमात्मा नारायणः।

**ज्ञानादिगुणसामान्ये वासुदेवः प्रकीर्तितः।**
**षण्णां गुणानां वैषम्ये वक्ष्यन्ते मूर्तयः क्रमात् ॥**
**ज्ञानाधिका भवेत् ब्रह्मन् सङ्कर्षणसमाह्वयः।**
**बले अधिकस्तु प्रद्युम्नस्स्यात् ऐश्वर्येऽनिरुद्धकः**[2]॥ इति

ज्ञानादिषड्गुणसमाश्रयः वासुदेवः ज्ञानगुणसमाश्रितः सङ्कर्षणः बलगुणसमाश्रयः प्रद्युम्नः ऐश्वर्यगुणसंयुक्तः अनिरुद्ध इत्येते त्रयः गुणाः एव प्रधानाः भवन्ति।

विभवमूर्तयः तावत् चतुर्भ्यः व्यूहरूपेभ्यः दशविभवरूपाण्यपि समागता आसन् इति पाञ्चरात्र पाद्मसंहिता उपदिशति । यथा इति चेत्

**मीनाद्या जज्ञिरे विप्र चतुर्व्यूहाद्यथाक्रमम्। मत्स्यः कूर्मो वराहश्च वासुदेवादजायत ॥**
**नृसिंहो वामनो रामो जामदग्न्योऽप्यजायत। संकर्षणात्तथा जज्ञे प्रद्युम्नाद्राघवो बली॥**
**अनिरुद्धादभूत् कृष्णः कल्कीति दशमूर्तयः**[3]॥ इति

पाद्मसंहितावचनानुसारं मत्स्य - कूर्म - वराह इति त्रयः विभवरूपाः वासुदेवात् समागता आसन्। अयमंशः समालोचनीयः। एते त्रयः रूपाः जलसंबद्धा एव । **अद्भ्यः पृथिवी** इति श्रृत्यानुसारं पृथिवी इयं जलादेव समुद्भूता । तस्य कारणभूतः श्रीमन्नारायणः। स एव परवासुदेवस्य प्रधानांशभूतः वासुदेवः स एव नारायणनाम्ना प्रसिद्धश्च ।जलादेव सृष्टिः आरब्धा जाता इति उपदेशसर्वस्व एव अत्र प्रतिभाति। सङ्कर्षणः नाम व्यूहरूपात् नृसिंह - वामन - परशुराम इति त्रयः विभवरूपः समागताः इति विचारणीयोऽयम् अंशः। एते त्रयः ओषधिरूपा एव ओषधयः मध्ये स्थिता आसन् ।

[1] पाद्मसंहिता ज्ञानपादः - 2 , 16 - 18

[2] तत्रैव - 2 , 20

[3] तत्रैव - 2, 31-33

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
( Fulfilled Suggests Parametres of UGC by IJMER)
Volume:14, Issue:9(1), September, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

प्रद्यम्नात् समागतौ द्वौ श्रीराम - बलरामौ - अन्नरूपौ भवतः। अनिरुद्धरूपात् आगतौ द्वौ कृष्ण कल्किरूपौ । एतौ जीवरूपौ भूतरूपौ च। अनिरुद्धः प्राणिनां सर्वेषां आधाररूप इति विशिष्टाद्वैतदर्शनं सम्यक् उपपादयति। चत्वारः वासुदेव - सङ्कर्षण - प्रद्युम्न - अनिरुद्ध इति व्यूहरूपा एव सृष्टेः आधार रूपाः भवन्ति एतत् श्रुतिसम्मतं[4] वैदिकं सर्वैः मानितं च भवति। असौ प्रधानतमः व्यूहविचारः व्यूहान्तर विचारस्तु साङ्गोपाङ्गम् उपदिष्टः पाञ्चरात्रवाङ्मये ।

**मूर्तिभ्यश्च चतुर्भ्यश्च चतुर्विंशतिमूर्तयः।**
**जायन्ते क्रमशो ब्रह्मन् दीपाद्दीपान्तरं यथा॥**
**सर्वे चतर्भुजाः पद्मशङ्खचक्रगदाधराः ।**
**वासुदेवादादिदेवात्प्रथमात् केशवस्तथा ॥**
**नारायणो माधवश्च जज्ञिरे भूसुरोत्तम ।**
**सङ्कर्षणाच्च गोविन्दो विष्णुश्च मधुसूदनः॥**
**त्रयस्ते समजायन्त प्रद्युम्नाच्च त्रिविक्रमः।**
**वामनः श्रीधरश्चैते जज्ञिरे मुनिसत्तम ॥**
**अनिरुद्धाद्धृषीकेशः पद्मनाभश्च सुव्रत।**
**दामोदरश्च तेनेत्थं द्वादशांशाः प्रजज्ञिरे[5]॥**

व्यूहरूपेभ्यः व्यूहान्तररूपाणि समागता अभवन्। दीपात् दीपान्तरमिव शाखात् शाखान्तरमिव च व्यूहदेवेभ्यः व्यूहान्तरदेवाः समागताः ज्ञायते। तद्यथा

**वासुदेवात् -** केशव - नारायण - माधवाः **सङ्कर्षणात् -** गोविन्द - विष्णु - मधुसूदनाः **प्रद्युम्नात् -** त्रिविक्रम - वामन - श्रीधराः **अनिरुद्धात् -** हृषीकेश - पद्मनाभ - दामोदरा एते समागताः अभवन् ।

एतेभ्यः व्यूह - व्यूहान्तररूपेभ्यः चराचरमिदं विश्वं प्रकृतिः विकृतिः सुखं दुःखं त्रयोगुणाः माया आहारत्रैविध्यं अणिमादि अष्टसिद्धयः विशाला पृथ्वी सप्तद्वीपाः सप्तसमुद्राः चत्वारि सरांसि ऊर्ध्वं अधोलोकाः अण्डानि व्यूहलोकाः सर्वं च जगत् समागतं इति सुस्पष्टं अवगम्यते अनेन।

**निष्कर्षः**

परमात्मा श्रीमन्नारायण एव सृष्टेः कारणभूतः स चासौ सृष्टि - स्थिति - लयानां कारणभूतः मुक्तिं प्रदातुं सर्वान् अनुग्रहीतुं च निधानभूतः ।

---

[4] अद्भ्यः पृथिवी , पृथव्या ओषधयः , ओषधीभ्योऽन्नम् , अन्नात् पुरुषः। तैत्रीय उपनिषन् आनन्दवल्ली (8 - 1)

[5] पाद्मसंहिता ज्ञानपादः - 2, 21-28

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
( Fulfilled Suggests Parametres of UGC by IJMER)
Volume:14, Issue:9(1), September, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

पररूपः वैकुण्ठे विराजति। व्यूहरूपः एव सृष्टेः कारणभूतः भवेत् विभवरूपाणां जन्मस्थानं व्यूहरूपमेव भवेत्। अतः सर्वेऽपि आस्तिकाः ज्ञानतत्पराः आगमज्ञाः भगवातः तत्त्वं सुसंसाध्य भगवदनुग्रहतत्पराः भवन्तु इति आशास्य विरमामि विस्तरात्।

**ज्ञानं सम्यक् अवेक्षणम्।**

**आधारग्रन्थाः**

**अहिर्बुध्न्यसंहिता**

अडयार् लैब्ररी अण्ड रीसर्च् सेन्टर् - मद्रास् - 1966

**ज्ञानपादसमीक्षणम्**

राष्ट्रीयसंस्कृतविद्यापीठम् - तिरुपतिः - 1998

**पाद्मसंहिता**

पाञ्चरात्रपरिशोधनापरिषत् - मद्रास् - 1974

**श्रीमन्नारायणसंहिता**

वैदिककल्चर् सेन्टर् - दिल्ली -1990